# shankarAdikRitaM gajAnanastotram

# ગજાનનસ્તોત્રં શંકરાદિકૃતમ્

## Document Information

Text title : sha.nkarAdikRitaM gajAnanastotram

File name : shankarAdikRitaMgajAnanastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : http://www.webdunia.com

Proofread by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)

Description-comments : mudgalapurANa

Latest update : March 9, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ગજાનનસ્તોત્રં શંકરાદિકૃતમ્

શ્રી ગણેશાય નમઃ ।

દેવા ઊચુઃ ।

ગજાનનાય પૂર્ણાય સાંખ્યરૂપમયાય તે ।
વિદેહેન ચ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૧॥

અમેયાય ચ હેરમ્બ પરશુધારકાય તે ।
મૂષકવાહનાયૈવ વિશ્વેશાય નમો નમઃ ॥ ૨॥

અનન્તવિભવાયૈવ પરેશાં પરરૂપિણે ।
શિવપુત્રાય દેવાય ગુહાગ્રજાય તે નમઃ ॥ ૩॥

પાર્વતીનન્દનાયૈવ દેવાનાં પાલકાય તે ।
સર્વેષાં પૂજ્યદેહાય ગણેશાય નમો નમઃ ॥ ૪॥

સ્વાનન્દવાસિને તુભ્યં શિવસ્ય કુલદૈવત ।
વિષ્ણ્વાદીનાં વિશેષેણ કુલદેવાય તે નમઃ ॥ ૫॥

યોગાકારાય સર્વેષાં યોગશાન્તિપ્રદાય ચ ।
બ્રહ્મેશાય નમસ્તુભ્યં બ્રહ્મભૂતપ્રદાય તે ॥ ૬॥

સિદ્ધિ-બુદ્ધિપતે નાથ! સિદ્ધિ-બુદ્ધિપ્રદાયિને ।
માયિને માયિકેભ્યશ્ચ મોહદાય નમો નમઃ ॥ ૭॥

લમ્બોદરાય વૈ તુભ્યં સર્વોદરગતાય ચ ।
અમાયિને ચ માયાયા આધારાય નમો નમઃ ॥ ૮॥

ગજઃ સર્વસ્ય બીજં યત્તેન ચિહ્નેન વિઘ્નપ!।
યોગિનસ્ત્વાં પ્રજાનન્તિ તદાકારા ભવન્તિ તે ॥ ૯॥

તેન ત્વં ગજવક્ત્રશ્ચ કિં સ્તુમસ્તવાં ગજાનન ।
વેદાદયો વિકુણ્ઠાશ્ચ શંકરાદ્યાશ્ચ દેવપાઃ ॥ ૧૦॥

શુક્રાદયશ્ચ શેષાદ્યાઃ સ્તોતું શક્તા ભવન્તિ નઃ ।
તથાપિ સંસ્તુતોઽસિ ત્વં સ્ફૂર્ત્યા ત્વદ્દર્શનાત્મના ॥ ૧૧॥

એવમુક્ત્વા પ્રણેમુસ્તં ગજાનનં શિવાદયઃ ।
સ તાનુવાચ પ્રીતાત્મા ભક્તિભાવેન તોષિતઃ ॥ ૧૨॥

ગજાનન ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
પઠતે શ‍ૃણ્વતે ચૈવ બ્રહ્મભૂતપ્રદાયકમ્ ॥ ૧૩॥

ઇતિ મૌદ્ગલોક્તં ગજાનનસ્તોત્રં સમાપ્તમ્ ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)
Amith K Nagaraj (amithkn@rediffmail.com)

---

*shankarAdikRitaM gajAnanastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*